# देहि पदम्  dehi padam

जय शंखगदाधर नीलकलेवर् पीतपटाम्बर देहि पदम् ।
jaya śaṅkhagadādhara nīlakalevar pītapaṭāmbara dehi padam |
जय चन्दनचर्चित कुण्डल मण्डित कौस्तुभशोभित देहि पदम् ॥
jaya candanacarcita kuṇḍala maṇḍita kaustubhaśobhita dehi padam ||

जय पंकज लोचन मारविमोहन पापविखण्डन देहि पदम् ।
jaya paṅkaja locana māravimohana pāpavikhaṇḍana dehi padam |
जय वेणुनिनादक रासविहारक बंकिम सुन्दर देहि पदम् ॥
jaya veṇuninādaka rāsavihāraka baṅkima sundara dehi padam ||

जय धीर धुरन्धर अद्भुत सुन्दर दैवतसेवित देहि पदम् ।
jaya dhīra dhurandhara adbhuta sundara daivatasevita dehi padam |
जय विश्वविमोहन मानसमोहन संस्ऋतिकारण देहि पदम् ॥
jaya viśvavimohana mānasamohana saṁsṙitikāraṇa dehi padam ||

जय भक्त जनाश्रय नित्य सुखालय अन्तिम बन्धव देहि पदम् ।
jaya bhakta janāśraya nitya sukhālaya antima bandhava dehi padam |
जय दुर्जयशासन केलिपरायण कालियमर्दन देहि पदम् ॥
jaya durjayaśāsana keliparāyaṇa kāliyamardana dehi padam ||

जय नित्य निरामय दीन दयामय चिन्मय माधव देहि पदम्    ।

jaya nitya nirāmaya dīna dayāmaya cinmaya mādhava dehi padam    |

जय पामरपावन धर्मपरायण दानवसूदन देहि पदम्    ॥

jaya pāmarapāvana dharmaparāyaṇa dānavasūdana dehi padam    ||

जय वेद वेदांवर गोपवधोप्रिय व्रिन्दावनधन  देहि पदम्    ।

jaya veda vedāṁvara gopavadhoopriya vrindāvanadhana  dehi padam    |

जय सेवकवत्सल करुणासागर वांछितपूरक देहि पदम्    ॥

jaya sevakavatsala karuṇāsāgara vāñchitapūraka dehi padam    ||

जय गोकुलभूषण कंसनिषूदन शाश्वत जीवन देहि पदम्    ।

jaya gokulabhūṣaṇa kaṁsaniṣūdana śāśvata jīvana dehi padam    |

जय योगपरायण संस्र्इतिवारण ब्रह्म निरंजन देहि पदम्    ॥

jaya yogaparāyaṇa saṁsřitivāraṇa brahma nirañjana dehi padam    ||